श्री दक्षिणकाळी कवचं 2

श्री दक्षिणकाळी कवचं 2

कैलासशिखरारूढं भैरवं चंद्रशेखरं |
वक्षःस्थले समासीना भैरवी परिपृच्छति || 1 ||

श्रीभैरव्युवाच |
देवेश परमेशान लोकानुग्रहकारकः |
कवचं सूचितं पूर्वं किमर्थं न प्रकाशितं || 2 ||

यदि मे महती प्रीतिस्तवास्ति कुल भैरव |
कवचं काळिका देव्याः कथयस्वानुकंपया || 3 ||

श्रीभैरव उवाच |
अप्रकाश्य मिदं देवि नरलोके विशेषतः |
लक्षवारं वारितासि स्त्री स्वभावाद्धि पृच्छसि || 4 ||

श्रीभैरव्युवाच |
सेवका बहवो नाथ कुलधर्म परायणाः |
यतस्ते त्यक्तजीवाशा शवोपरि चितोपरि || 5 ||

तेषां प्रयोग सिद्ध्यर्थं स्वरक्षार्थं विशेषतः |
पृच्छामि बहुशो देव कथयस्व दयानिधे || 6 ||

श्रीभैरव उवाच |
कथयामि शृणु प्राज्ञे काळिका कवचं परं |
गोपनीयं पशोरग्रे स्वयोनिमपरे यथा || 7 ||

अस्य श्री दक्षिणकाळिका कवचस्य भैरव ऋषिः उष्णिक् छंदः अद्वैतरूपिणी श्री दक्षिणकाळिका देवता ह्रीं बीजं हूं शाक्तिः क्रीं कीलकं सर्वार्थ साधन पुरःसर मंत्र सिद्ध्यर्थे पाठे विनियोगः |

अथ कवचं |
सहस्रारे महापद्मे कर्पूरधवळो गुरुः |
वामोरुस्थिततच्छक्तिः सदा सर्वत्र रक्षतु || 8 ||

परमेशः पुरः पातु परापरगुरुस्तथा |
परमेष्ठी गुरुः पातु दिव्य सिद्धिश्च मानवः || 9 ||

महादेवी सदा पातु महादेवः सदाऽवतु |
त्रिपुरो भैरवः पातु दिव्यरूपधरः सदा || 10 ||

ब्रह्मानंदः सदा पातु पूर्णदेवः सदाऽवतु |
चलश्चित्तः सदा पातु चेलांचलश्च पातु मां || 11 ||

कुमारः क्रोधनश्चैव वरदः स्मरदीपनः |
मायामायावती चैव सिद्धौघाः पातु सर्वदा || 12 ||

विमलो कुशलश्चैव भीमसेनः सुधाकरः |
मीनो गोरक्षकश्चैव भोजदेवः प्रजापतिः || 13 ||

मूलदेवो रंतिदेवो विघ्नेश्वर हुताशानः |
संतोषः समयानंदः पातु मां मनवा सदा || 14 ||

सर्वेऽप्यानंदनाथांतः अंबां तां मातरः क्रमात् |
गणनाथः सदा पातु भैरवः पातु मां सदा || 15 ||

वटुको नः सदा पातु दुर्गा मां परिरक्षतु |
शिरसः पादपर्यंतं पातु मां घोरदक्षिणा || 16 ||

तथा शिरसि मां काळी हृदि मूले च रक्षतु |
संपूर्ण विद्यया देवी सदा सर्वत्र रक्षतु || 17 ||

क्रीं क्रीं क्रीं वदने पातु हृदि हूं हूं सदाऽवतु |
ह्रीं ह्रीं पातु सदाधारे दक्षिणे काळिके हृदि || 18 ||

क्रीं क्रीं क्रीं पातु मे पूर्वे हूं हूं दक्षे सदाऽवतु |
ह्रीं ह्रीं मां पश्चिमे पातु हूं हूं पातु सदोत्तरे || 19 ||

पृष्ठे पातु सदा स्वाहा मूला सर्वत्र रक्षतु |
षडंगे युवती पातु षडंगेषु सदैव मां || 20 ||

मंत्रराजः सदा पातु ऊर्ध्वाधो दिग्विदिक् स्थितः |
चक्रराजे स्थिताश्चापि देवताः परिपांतु मां || 21 ||

उग्रा उग्रप्रभा दीप्ता पातु पूर्वे त्रिकोणके |
नीला घना बलाका च तथा परत्रिकोणके || 22 ||

मात्रा मुद्रा मिता चैव तथा मध्य त्रिकोणके |
काळी कपालिनी कुल्ला कुरुकुल्ला विरोधिनी || 23 ||

बहिः षट्कोणके पांतु विप्रचित्ता तथा प्रिये |
सर्वाः श्यामाः खड्गधरा वामहस्तेन तर्जनीः || 24 ||

ब्राह्मी पूर्वदळे पातु नारायणी तथाग्निके |
माहेश्वरी दक्षदळे चामुंडा रक्षसेऽवतु || 25 ||

कौमारी पश्चिमे पातु वायव्ये चापराजिता |
वाराही चोत्तरे पातु नारसिंही शिवेऽवतु || 26 ||

ऐं ह्रीं असितांगः पूर्वे भैरवः परिरक्षतु |
ऐं ह्रीं रुरुश्चाजिनकोणे ऐं ह्रीं चंडस्तु दक्षिणे || 27 ||

ऐं ह्रीं क्रोधो नैर्ऋतेऽव्यात् ऐं ह्रीं उन्मत्तकस्तथा |
पश्चिमे पातु ऐं ह्रीं मां कपाली वायु कोणके || 28 ||

ऐं ह्रीं भीषणाख्यश्च उत्तरेऽवतु भैरवः |
ऐं ह्रीं संहार ऐशान्यां मातृणामंकगा शिवाः || 29 ||

ऐं हेतुको वटुकः पूर्वदळे पातु सदैव मां |
ऐं त्रिपुरांतको वटुकः आग्नेय्यां सर्वदाऽवतु || 30 ||

ऐं वह्नि वेताळो वटुको दक्षिणे मां सदाऽवतु |
ऐं अग्निजिह्ववटुकोऽव्यात् नैर्ऋत्यां पश्चिमे तथा || 31 ||

ऐं कालवटुकः पातु ऐं कराळवटुकस्तथा |
वायव्यां ऐं एकः पातु उत्तरे वटुकोऽवतु || 32 ||

ऐं भीमवटुकः पातु ऐशान्यां दिशि मां सदा |
ऐं ह्रीं ह्रीं हूं फट् स्वाहांताश्चतुः षष्टि मातरः || 33 ||

ऊर्ध्वाधो दक्षवामार्गे पृष्ठदेशे तु पातु मां |
ऐं हूं सिंहव्याघ्रमुखी पूर्वे मां परिरक्षतु || 34 ||

ऐं कां कीं सर्पमुखी अग्निकोणे सदाऽवतु |
ऐं मां मां मृगमेषमुखी दक्षिणे मां सदाऽवतु || 35 ||

ऐं चौं चौं गजराजमुखी नैर्ऋत्यां मां सदाऽवतु |
ऐं में में विडालमुखी पश्चिमे पातु मां सदा || 36 ||

ऐं खौं खौं क्रोष्टुमुखी वायुकोणे सदाऽवतु |
ऐं हां हां ह्रस्वदीर्घमुखी लंबोदर महोदरी || 37 ||

पातुमामुत्तरे कोणे ऐं ह्रीं ह्रीं शिवकोणके |
ह्रस्वजंघतालजंघः प्रलंबौष्ठी सदाऽवतु || 38 ||

एताः श्मशानवासिन्यो भीषणा विकृताननाः |
पांतु मा सर्वदा देव्यः साधकाभीष्टपूरिकाः || 39 ||

इंद्रो मां पूर्वतो रक्षेदाग्नेय्यामग्निदेवता |
दक्षे यमः सदा पातु नैर्ऋत्यां नैर्ऋतिश्च मां || 40 ||

वरुणोऽवतु मां पश्चात् वायुर्मां वायवेऽवतु |
कुबेरश्चोत्तरे पायात् ऐशान्यां तु सदाशिवः || 41 ||

ऊर्ध्वं ब्रह्मा सदा पातु अधश्चानंतदेवता |
पूर्वादिदिक् स्थिताः पांतु वज्राद्याश्चायुधाश्च मां || 42 ||

काळिकाऽवातु शिरसि हृदये काळिकाऽवतु |
आधारे काळिका पातु पादयोः काळिकाऽवतु || 43 ||

दिक्षु मां काळिका पातु विदिक्षु काळिकाऽवतु |
ऊर्ध्वं मे काळिका पातु अधश्च काळिकाऽवतु || 44 ||

चर्मासृङ्मांसमेदाऽस्थि मज्जा शुक्राणि मेऽवतु |
इंद्रियाणि मनश्चैव देहं सिद्धिं च मेऽवतु || 45 ||

आकेशात् पादपर्यंतं काळिका मे सदाऽवतु |
वियति काळिका पातु पथि मां काळिकाऽवतु || 46 ||

शयने काळिका पातु सर्वकार्येषु काळिका |
पुत्रान् मे काळिका पातु धनं मे पातु काळिका || 47 ||

यत्र मे संशयाविष्टास्ता नश्यंतु शिवाज्ञया |
इतीदं कवचं देवि ब्रह्मलोकेऽपि दुर्लभं || 48 ||

तव प्रीत्या मायाख्यातं गोपनीयं स्वयोनिवत् |
तव नाम्नि स्मृते देवि सर्वज्ञं च फलं लभेत् || 49 ||

सर्वपापक्षयं यांति वांछा सर्वत्र सिद्ध्यति |
नाम्नाः शतगुणं स्तोत्रं ध्यानं तस्माच्छताधिकं || 50 ||

तस्मात् शताधिको मंत्रः कवचं तच्छताधिकं |
शुचिः समाहितो भूत्वा भक्ति श्रद्धा समन्वितः || 51 ||

संस्थाप्य वामभागे तु शक्तिं स्वामि परायणां |
रक्तवस्त्रपरिधानां शिवमंत्रधरां शुभां || 52 ||

या शक्तिः सा महादेवी हररूपश्च साधकः |
अन्योऽन्य चिंतयेद्देवीं देवत्वमुपजायते || 53 ||

शक्तियुक्तो यजेद्देवीं चक्रे वा मनसापि वा |
भोगैश्च मधुपर्काद्यैस्तांबूलैश्च सुवासितैः || 54 ||

ततस्तु कवचं दिव्यं पठदेकमनाः प्रिये |
तस्य सर्वार्थ सिद्धिस्यान्नात्र कार्याविचारणा || 55 ||

इदं रहस्यं परमं परं स्वस्त्ययनं महत् |
या सकृत्तु पठेद्देवि कवचं देवदुर्लभं || 56 ||

सर्वयज्ञफलं तस्य भवेदेव न संशयः |
संग्रामे च जयेत् शत्रून् मातंगानिव केशरी || 57 ||

नास्त्राणि तस्य शस्त्राणि शरीरे प्रभवंति च |
तस्य व्याधि कदाचिन्न दुःखं नास्ति कदाचन || 58 ||

गतिस्तस्यैव सर्वत्र वायुतुल्यः सदा भवेत् |
दीर्घायुः कामभोगीशो गुरुभक्तः सदा भवेत् || 59 ||

अहो कवच माहात्म्यं पठ्यमानस्य नित्यशः |
विनापि नययोगेन योगीश समतां व्रजेत् || 60 ||

सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः |
न शक्नोमि प्रभावं तु कवचस्यास्य वर्णितं || 61 ||

इति श्री दक्षिणकाळिका कवचं |